## श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर/दिसम्बर् - २०१६

कक्षा- तत्वाचार्यः -(Sem – 1) **प्रश्नपत्रम् - २** गुणाः - ७०

विषयः - वेदः समयः- ११:०० तः २:००

दिनाङ्कः – २५-११-२०१६ सन्दर्भग्रन्थः - बृहद्देवता प्रातिशाख्यञ्च।

---

प्रथमान्वितिः (युनिट - १)

**प्रश्नः- १ अधोलिखितयोः एक एव प्रश्नः समाधेयः।** (१२)

(क) बृहद्देवताया अनुसारं द्रव्यस्य स्वरूपमुपस्थापयत।

(ख) बृहद्देवतानुसारं ऋक्षु स्तुति- आशिषोर्विषये यथाज्ञानं लिखत।

**प्रश्नः- २ अधोलिखितयोरप्येकस्यैव श्लोकस्य व्याख्या विधेया।** (४)

(क) ऋतू च ग्रीष्महेमन्तौ यश्च सामोच्यते बृहत्।
शक्करीषु च यद्गीतं नाम्ना तत्साम शाक्करम् ॥

(ख)न मृत्युरासीदित्येताम् आचिख्यासां प्रचक्षते।
अभिशाप अप्रजाःसन्तु भद्रमाशीस्तु गोतमे ॥

**प्रश्नः- ३ अधोलिखतेषु केषांचित् चतुर्णामेवसंक्षिप्तमुत्तरं प्रस्तूयताम्।** (४)

(क) बृहद्देवतानुसारं प्रैषस्योदाहरणं लिखत।

(ख) यदिन्द्राहम् इति संकल्पस्य, आशीर्वादस्य वास्ति उदाहरणम्?

(ग) हये जाये इत्यत्र कस्य संकेतः अस्ति?

(घ) प्रमादप्रधानस्य मन्त्रस्य बृहद्देवतानुसारमुल्लेखः विधीयताम्।

(ङ) बृहद्देवतानुसारम् किमस्ति देवानामायुधम्?

(च) सूर्यः आत्मानं कतिधा करोति?

द्वितीयान्वितिः (युनिट - २)

**प्रश्नः- ४ अधोलिखितयोरप्येकस्यैवोत्तरं लिखत।** (८)

(क) बृहद्देवतानुसारं सूर्यक्षेत्रीयदेवतानां विषये यथाज्ञानं लिखत।

(ख)सूर्यवैश्वानरयोःविषये (बृहद्देवतानुसारम्) स्व विचारान् प्रतिपादयत।

**प्रश्नः- ५ अधोलिखितयोरप्येकस्यैव श्लोकस्य व्याख्या प्रस्तूयताम् ।** (४)

(क) जातो यदग्रेभूतानाम् अग्रणीरध्वरे च यत्।
नाम्नासंनयते वाङ्गं स्तुतोग्निरिति सूरिभिः ॥

(ख)प्राणभूतस्तु भूतेषु यद्वेनत्येषु तिष्ठति।

तेनैनं वेनमाहर्षिर्वेनो नामेह भार्गवः ॥

**प्रश्नः- ६ अधोलिखितेषु त्रीन् एव शब्दान् स्पष्टयत ।** (३)

(क) निदाघमासः (ख) स्तुवन् (ग) सविता

(घ)वाचं प्राहुः सरस्वतीम् –इत्यस्यार्थं लिखत।

(ङ)बृहद्देवतायां कस्य नाम अस्ति श्रुतबन्धु- इति ?

तृतीयान्वितिः (युनिट - ३)

**प्रश्नः- ७ अधोलिखितयोरप्येकस्यैवोत्तरं लिखत।** (१२)

(अ) प्रातिशाख्य-शब्दस्य व्युत्पत्यर्थं निरूप्य प्रातिशाख्यग्रन्थानां स्वरूपं वैशिष्ट्यञ्चोपपादयत।

(क) प्रातिशाख्यग्रन्थाध्ययनस्य फलं निरूपयत।

**प्रश्नः- ८ अधोलिखितेषु प्रातिशाख्यसूत्रेषु द्वे एव सूत्रे सोदाहरणं व्याख्यायेताम्।** (४)

(क)स्याद्वाम्नायधर्मित्वाच्छन्दसि नियमः। (ख)त्रीणि स्थानानि

(ग) तिङ्कृत्तद्धितसमासाः शब्दमयम्। (घ) सवनक्रमेणोरःकण्ठभ्रूमध्यानि

**प्रश्नः- ९ अधोलिखितेषु पारिभाषिकशब्देषु चतुरान् एव शब्दान् स्पष्टयत।** (४)

(क) आयामः (शु.य.प्रातिशाख्य सन्दर्भे) (ख) मार्दवः (ग)उपधा

(घ) रिफित् (ङ) नतिः

चतुर्थान्वितिः (युनिट – ४)

**प्रश्नः१० अधोलिखितयोरप्येकस्यैवोत्तरं लिखत।** (८)

(क)शुक्लयजुःप्रातिशाख्यस्य द्वितीयाध्यायानुसारं स्वरविषये यथाज्ञानं लिखत।

(ख) शुक्लयजुःप्रातिशाख्यस्य द्वितीयाध्यायानुसारम् ये अनुदात्ताः वैदिकशब्दाः न भवन्ति तेषां विषये विस्तरेण लिखत।

**प्रश्नः ११ अधोलिखितेषु सूत्रेषु द्वे एव सूत्रे व्याख्यायेताम्।** (४)

(क) स्वरितवर्जमेकोदात्तम् पदम् (ख) वृद्धं वृद्धिः

(ग)पक्तिर्हसयोरन्त उदात्त आदिर्वा (घ) ऋक्साम्नि च।

**प्रश्नः १२ अधोलिखितेष्वपि त्रय एव प्रश्नाः समाधेयाः ।** (३)

(क)धनदा इति शब्दगत् पश्चाद्वर्तिशब्दस्य कः स्वरो भवति?

(ख)रायोपोषे इत्यस्य कोर्थः ?

(ग) रोहितश्च केवलः इति सूत्रं किं कथयति?

(घ)शिवा शब्दानन्तरं यदा असि पदं भवति तदा कतमः स्वरो भवति असि पदे ?

(ङ) सुकृतं भूते –इत्यस्य कोर्थः?

******